STOTRADHWANI

LEARN CORRECTLY, CHANT CONFIDENTLY

# ७ सप्तम दशकः - शुकोत्पत्तिः

कृष्णस्य तस्या रणितः शुकाख्यः तव प्रसादा दजनिष्ट पुत्रः ।
हृष्टो मुनि र्मङ्गल कर्म चक्रे तत्रादितेया ववृषुः सुमानि ॥ ७-१॥

केचिज्जगुः केचन वाद्यघोषं चक्रुश्च नाके ननृतुः स्त्रियश्च ।
वायुर्ववौ स्पर्श सुखः सुगन्धः शुकोद्भवे सर्वजनाः प्रहृष्टाः ॥ ७-२॥

बालः स सद्यो ववृधे सुचेताः बृहस्पते रात्त समस्त विद्यः ।
दत्वा विनीतो गुरुदक्षिणां च प्रत्यागतो हर्षयति स्म तातम् ॥ ७-३॥

युवान मेकान्त तपः प्रवृत्तं व्यासः कदाचिच्छुकमेव मूचे ।
वेदांश्च शास्त्राणि च वेत्सि पुत्र कृत्वा विवाहं भव सद्गृहस्थः ॥ ७-४॥

सर्वाश्रमाणां कवयो विशिष्टा गृहाश्रमं श्रेष्ठतरं वदन्ति ।
तमाश्रित स्तिष्ठति लोक एष यजस्व देवान् विधिवत्पितॄंश्च ॥ ७-५॥

तवास्तु सत्पुत्र ऋणादहं च मुच्येय मां त्वं सुखिनं कुरुष्व ।
पुत्रः सुखायात्र परत्र च स्यात् त्वां पुत्र तीव्रैरलभे तपोभिः ॥ ७-६॥

किञ्च प्रमाथीनि सदेन्द्रियाणि हरन्ति चित्तं प्रसभं नरस्य ।
पश्यन् पिता मे जननीं तपस्वी पराशरोऽपि स्मरमोहितोऽभूत् ॥ ७-७॥

य आश्रमा दाश्रममेति तत्तत् कर्माणि कुर्वन् स सुखी सदा स्यात् ।
गृहाश्रमो नैव च बन्ध हेतुः त्वया च धीमन् क्रियतां विवाहः ॥ ७-८॥

एवं ब्रुवाणोऽपि शुकं विवाहाति असक्त माज्ञाय पितेव रागी ।
पुराणकर्त्ता च जगद्गुरुः स माया निमग्नोऽश्रुविलोचनोऽभूत् ॥ ७-९॥

भोगेषु मे निस्पृहताऽस्तु मातः प्रलोभितो मा करवाणि पापम् ।
मा बाधतां मां तव देवि माया मायाधिनाथे सततं नमस्ते ॥ ७-१०॥